"श्रद्धत्वाश्च तथा दृश्वश्वतस्रो विंशतिस्तथा ।
सर्व्वं कन्यास्तावाश्च सम्यङ्नामानि मे शृणु ॥
श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा क्रिया तथा ।
बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्त्तिस्त्रयो-
दशी ॥
पत्न्यर्थं प्रतिजग्राह धर्म्मो दाक्षायणीः प्रभुः ॥")
मातृकाविशेषः । इति भवदेवभट्टः ॥ (शक्ति-
विशेषः । यथा, देवीभागवते । १ । १५ । ६१ ।
"तुष्टिः पुष्टिः क्षमा लज्जा जृम्भा तन्द्रा च शक्तयः ।
संस्थिताः सर्व्वतः पार्श्वे महादेव्याः पृथक्
पृथक् ॥")

तुष्टुः, पुं, (तुष+बाहुलकात् तुक् ।) कर्ण-
मणिः । इति शब्दचन्द्रिका ॥

तुस, ध्वाने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-
अकं-सेट् ।) तोसति । इति दुर्गादासः ॥

तुसः, पुं, (तुषः । पृषोदरादित्वात् सत्वम् ।) तुषः ।
इत्यमरटीकायां रमानाथः ॥

तुस्तं, क्ली, धूलिः । इति लिङ्गादिसंग्रहे वृत्तशब्द-
टीकायां सारसुन्दरी ॥

तुह, इर् अर्द्दने । इति कविकल्पद्रुमः ॥ (भ्वां-
परं-सकं-सेट् ।) इर्, अतुहत् अतोहीत् ।
अर्द्दनमिह वधः । इति दुर्गादासः ॥

तुहिनं, क्ली, (तोहति अर्द्दति तुह्यतेऽनेनेति वा ।
तुह+"वेपितुह्योर्ह्रस्वश्च ।" उणां । २ । ५२ ।
इति इनन् गुणे प्राप्ते ह्रस्वश्च ।) हिमम् । इत्य-
मरः । १ । ३ । १८ ॥ (यथा, आर्य्यासप्त-
शत्याम् । ६३२ ।
"सा श्यामा तन्वङ्गी दहता शीतोपचारतीव्रेण ।
विरहेण पाण्डिमानं नीता तुहिनेन दूर्व्वेव ॥")
चन्द्रतेजः । इत्युणादिकोषः ॥ (यथा, पञ्च-
तन्त्रे । २ । ५८ ।
"किं चन्दनैः सकर्पूरैस्तुहिनैः शीतलैश्च किम् ।
सर्व्वे ते मित्रगात्रस्य कलां नार्हन्ति षोड़शीम् ॥"
शीतले, त्रि । यथा, आर्य्यासप्तशत्याम् । ३६६ ।
"प्रसरतु शरत्त्रियामा जगन्ति धवलयतु धाम
तुहिनांशोः ।
पञ्जरचकोरिकायां कणिकाकल्पोऽपि न
विशेषः ॥")

तुहिनांशुतैलं, क्ली, (तुहिनांशोः कर्पूरस्य तैलम् ।)
कर्पूरतैलम् । इति राजनिर्घण्टः ॥

तूड, ऋ अनादरे । इति कविकल्पद्रुमः ॥ (भ्वां-
परं-सकं-सेट् ।) षष्ठस्वरी । ऋ, अतुतूड़त् ।
इति दुर्गादासः ॥

तूण, क सङ्कोचे । इति कविकल्पद्रुमः ॥ (चुरां-
परं-अकं-सेट् ।) दन्त्यवर्गाद्यादिः । क, तूणयति
चक्षुः सङ्कुचितं स्यादित्यर्थः । इति दुर्गादासः ॥

तूण, क ङ पूरणे । इति कविकल्पद्रुमः ॥ (चुरां-
आत्मं-सकं-सेट् ।) क ङ, तूणयते । इति दुर्गा-
दासः ॥

तूण, त क सङ्कोचे । इति कविकल्पद्रुमः ॥ (अदन्त-
चुरां-परं-अकं-सेट् ।) दीर्घी मूर्द्धन्योपधः ।
अतुतूणत् । इति दुर्गादासः ॥

तूणः, पुं स्त्री, (तूण्यते पूर्य्यते बाणैरिति । तूण+
पूरणे घञ् ।) बाणाधारः । तत्पर्य्यायः । उपा-
सङ्गः २ तूणीरः ३ निषङ्गः ४ इषुधिः ५ । इत्य-
मरः । २ । ८ । ८८ ॥ तूणी ६ । इति शब्द-
रत्नावली ॥ (यथा, महाभारते । ३ । १७ । ३ ।
"तूणखड्गधरः शूरो बद्धगोधाङ्गुलित्रवान् ॥")

तूणकं, क्ली, (तूणयति सङ्कुचितं भवति समा-
निकापदद्वयमिति । तूण+ण्वुल् ।) छन्दो-
विशेषः । यथा, छन्दोमञ्जर्य्याम् ।
"तूणकं समानिकापदद्वयं विनान्तिमम् ॥"

तूणी, स्त्री, (तूण्यते पूर्य्यते बाणैरिति । तूण+
कर्म्मणि घञ् । गौरादित्वात् ङीष् ।) तूणः ।
इति शब्दरत्नावली ॥ (यथा, रघुः । ६ । ५६ ।
"तूणीसुखोद्धृतशरेण विशीर्णपङ्क्ति ॥"
वेदनाविशेषः । यथा, सुश्रुते निदानस्थाने
१ अध्याये ।
"अधो या वेदना याति वर्चोमूत्राशयोत्थिता ।
भिन्दन्तीव गुदोपस्थं सा तूणीत्युपदिश्यते ॥")

तूणी, [न्] पुं, (तूणवदाकृतिरस्त्यस्येति । तूण+
इनिः ।) नन्दीवृक्षः । इति राजनिर्घण्टः ॥
(अस्य पर्य्याया यथा,—
"तूणी तुन्नक आपीनस्तुणिकः कच्छकस्तथा ।
कुठेरकः कान्तलको नन्दिवृक्षश्च नन्दकः ॥"
गुणाश्चास्य यथा,—
"तुणी रक्तः कटुः पाके कषायो मधुरो लघुः ।
तिक्तो ग्राही हिमो वृष्यो व्रणकुष्ठास्रपित्त-
जित् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
तूणयुक्ते, त्रि ॥ (यथा, हरिवंशे भविष्यपर्व्वणि ।
१८ । ३५ ।
"आरुह्य भगवान् विष्णुर्गरुड़ं पक्षिपुङ्गवम् ।
शङ्खी चक्री गदी खड्गी शार्ङ्गी तूणी तलत्र-
वान् ॥")

तूणीकः, पुं, (तूणी तूण इव कायतीति । कै+
कः ।) नन्दीवृक्षः । इति राजनिर्घण्टः ॥

तूणीरः, पुं, (तूण्यते पूर्य्यते बाणैरिति । तूण+
बाहुलकात् ईरन् ।) तूणः । इत्यमरः । २ । ८ ।
८८ ॥ (यथा, महाभारते । ७ । २८ । १६ ।
"तस्य पार्थो धनुश्छित्त्वा तूणीरान् सन्निकृत्य च ।
त्वरमाणो द्विसप्तत्या सर्व्वमर्म्मस्वताड़यत् ॥"
क्लीवलिङ्गेऽपि दृश्यते । यथा, तत्रैव । ६ । ५१ ।
५१ ।
"तूणीराण्यथ यन्त्राणि विचित्राणि धनूंषि च ॥")

तूतं, क्ली, तुत्थम् । इतिशब्दचन्द्रिका ॥ तुतिया
इति भाषा ॥ (तुत्थशब्देऽस्य गुणादिकं ज्ञात-
व्यम् ॥)

तूदः, पुं, (तुदतीति । तुद व्यथने+"इगुपधेति ।"
३ । १ । १३५ । इति कः । पृषोदरादित्वात्
दीर्घः ।) तूलवृक्षः । इति राजनिर्घण्टः ॥

तूर, य ङ ई हिंसे । वेगे । इति कविकल्पद्रुमः ।
(दिवां-आत्मं-सकं-वेगे अकं-सेट् ।) य ङ,
तूर्य्यते । ई, तूर्णः । इति दुर्गादासः ॥

तूरं, क्ली, (तूर्य्यते ताड्यते इति । तूर+घञ् ।)
वाद्यम् । इति हेमचन्द्रः । २ । २०० ॥

तूरी, स्त्री, (तूरं वाद्यविशेषस्तदाकृतिः पुष्पादौ
अस्त्यस्येति । तूर+अच् । गौरादित्वात् ङीष् ।)
धुस्तूरवृक्षः । इति भावप्रकाशः ॥

तूर्णं, क्ली, (त्वर सम्भ्रमे+क्तः । पक्षे इड़भावः
"ज्वरत्वरेति ।" ६ । ४ । २० । इत्यूट् । "रदाभ्यां
निष्ठातो नः पूर्व्वस्य च दः ।" ८ । २ । ४२ ।
इति तस्य नः ।) शीघ्रम् । (यथा, देवीभाग-
वते । १ । १० । २ ।
"तां दृष्ट्वा चपलापाङ्गीं समीपस्थां वराप्सराम् ।
पञ्चबाणपरीताङ्गस्तूर्णमासीद्धृतव्रतः ॥")
तद्वति, त्रि । इत्यमरः । १ । २ । ६८ ॥

तूर्णिः, पुं, (त्वरते त्वरणं वा । त्वर+"वहिश्रिश्रु-
युद्रुग्लाहात्वरिभ्यो नित् ।" उणां । ४ । ५१ ।
इति निः स च नित् ।) मलम् । इत्युणादि-
कोषः । २ । १४१ ॥ त्वरा । इति हेमचन्द्रः ।
२ । २३६ ॥ श्लोकः । मनः । इति संक्षिप्तसारे
उणादिवृत्तिः ॥ (क्षिप्रे, त्रि । इति निघण्टुः ।
२ । १५ ॥ यथा, ऋग्वेदे । १० । ८८ । ६ ।
"मायामू तु यज्ञियानामेतामपो यत्तूर्णिश्चरति
प्रजानन् ॥"
"तूर्णिस्त्वरमाणः ।" इति सायनः ॥)

तूर्य्यं, क्ली, (तूर्य्यते ताड्यते इति । तूर्+ण्यत् ।)
वाद्यम् । इति हेमचन्द्रः । २ । २८६ ॥ (यथा,
महाभारते । १ । ११३ । ४४ ।
"स तूर्य्यशतशङ्खानां भेरीणाञ्च महास्वनैः ।
हर्षयन् सर्व्वशः पौरान् विवेश गजसाह्व-
यम् ॥")

तूर्य्यखण्डः, पुं, (तूर्य्यस्य खण्ड इव ।) ढगड़वाद्यम् ।
इति हारावली । २२२ ॥ (क्वचित् तूर्य्यगण्डोऽपि
पाठः ॥)

तूल, क ङ पूरणे । इति कविकल्पद्रुमः ॥ (चुरां-
आत्मं-सकं-सेट् ।) दीर्घी । क ङ, तूलयते । इति
दुर्गादासः ॥

तूल, क निष्कर्षे । इति कविकल्पद्रुमः ॥ (चुरां-
परं-सकं-सेट् ।) दीर्घी । निष्कर्ष इह इयत्ता-
परिच्छेदः । क, तूलयति काञ्चनं वणिक् । इति
दुर्गादासः ॥ (क्वचित् तूल कि निष्कर्षे इति
पाठोऽपि दृश्यते । कि, तूलति तूलयति ॥)

तूलं, क्ली, (तूलयते पूरयति सर्व्वं व्यापकत्वात् ।
तूल पूरणे+कः ।) आकाशम् । इति मेदिनी ।
ले, २५ ॥ अश्वत्थाकारवृक्षविशेषः । पलाश-
पिपल इति तूत इति च भाषा ॥ तत्पर्य्यायः ।
तूदः २ ब्रह्मकाष्ठम् ३ ब्रह्मपोटः ४ पूषकः ५
ब्रह्मदारु ६ सुपुष्पम् ७ सुरूपम् ८ नीलवृन्त-
कम् ९ क्रमुकः १० विप्रकाष्ठम् ११ मदसारः १२ ।
इति राजनिर्घण्टः ॥ पूगः १३ । तत्पक्वफल-
गुणाः । गुरुत्वम् । स्वादुत्वम् । हिमत्वम् ।
पित्तानिलनाशित्वञ्च । तदामफलगुणाः । गुरु-
त्वम् । सारकत्वम् । अम्लत्वम् । उष्णत्वम् ।
रक्तपित्तकारित्वञ्च । इति भावप्रकाशः ॥ मधु-